संशयोत्र तु मे विप्र संछिन्नस्तत्कृतो महान्। ऋषयोपि हि मुह्यंति यत्र नेंद्रियवृत्तयः। कर्माण्यारभते येन पुमानिह विहाय तं। अ
मुत्रान्येन देहेन जुष्टानि स यदश्नुते॥५९॥ इति वेदविदां वादः श्रूयते तत्र तत्र ह। कर्म यत्क्रियते प्रोक्तं परोक्षं न प्रकाशते॥६०॥ श्रीनारदः॥
येनैवारभते कर्म तेनैवामुत्र तत्पुमान्। भुंक्ते ह्यव्यवधानेन लिंगेन मनसा स्वयं॥६१॥ शयानमिममुत्सृज्य श्वसंतं पुरुषो यथा। क
र्मात्मन्याहितं भुंक्ते तादृशेनेतरेण वा॥६२॥ ममैते मनसा यद्यदसावहमिति ब्रुवन्। गृह्णीयात्तत्पुमान्राद्धं कर्म येन पुनर्भवः॥६३॥ यथा
नुमीयते चित्तमुभयैरिंद्रियेहितैः। एवं प्राग्देहजं कर्म लक्ष्यते चित्तवृत्तिभिः॥६४॥ नानुभूतं क्व चानेन देहेनादृष्टमश्रुतं। कदाचिदुपल
भ्यते यद्रूपं यादृगात्मनि॥६५॥ तेनास्य तादृशं राजँल्लिंगिनो देहसंभवं। श्रद्धत्स्वाननुभूतोर्थो न मनः स्प्रष्टुमर्हति॥६६॥ मन एव मनुष्य
स्य पूर्वरूपाणि शंसति। भविष्यतश्च भद्रं ते तथैव न भविष्यतः॥६७॥ अदृष्टमश्रुतं चात्र क्वचिन्मनसि दृश्यते। यथा तथानुमंतव्यं देशका
३७ लक्रियाश्रयं॥६८॥ सर्वे क्रमानुरोधेन मनसींद्रियगोचराः। आयांति वर्गशो यांति सर्वे समनसो जनाः॥६९॥ सत्त्वैकनिष्ठे मनसि भगवत्पा ३७
र्श्ववर्तिनि। तमश्चंद्रमसीवेदमुपरज्यावभासते॥७०॥ नाहं ममेति भावोयं पुरुषे व्यवधीयते। यावद्बुद्धिमनोक्षार्थगुणव्यूहो ह्यनादिमान्॥७१॥
सुप्तिमूर्छोपतापेषु प्राणायनविघातकः। नेहतेहमिति ज्ञानं पुरुषे व्यवधीयते॥७२॥ गर्भे बाल्येप्यपौष्कल्यादेकादशविधं तदा। लिंगं न दृ
श्यते यूनः कुह्वां चंद्रमसो यथा॥७३॥ अर्थे ह्यविद्यमानेपि संसृतिर्न निवर्तते। ध्यायतो विषयानस्य स्वप्नेनर्थागमो यथा॥७४॥ एवं पंचवि
धं लिंगं त्रिवृत्षोडशविस्तृतं। एष चेतनया युक्तो जीव इत्यभिधीयते॥७५॥ अनेन पुरुषो देहानुपादत्ते विमुंचति। हर्षं शोकं भयं दुःखं सुखं
चानेन विंदति॥७६॥ यथा तृणजलूकैवं नापयात्यपयाति चान्। त्यजन्म्रियमाणोपि प्राग्देहाभिमतिं जनः॥७७॥ यावदन्यं न विंदेत व्य
वधानेन कर्मणां। मन एव मनुष्येंद्र भूतानां भवभावनं॥७८॥ यदाक्षैश्चरितान्ध्यायन्कर्माण्याचिनुतेसकृत्। सति कर्मण्यविद्यायां बंधः

कर्मण्यनात्मनः॥७९॥ अतस्तदपवादार्थं भज सर्वात्मना हरिं। पश्यंस्तदात्मकं विश्वं स्थित्युत्पत्त्यप्यया यतः॥८०॥ ॥मैत्रेय उवाच॥ ॥भा
गवतमुख्यो भगवान्नारदो हंसयोर्गतिं। प्रदर्श्य ह्यमुमामंत्र्य सिद्धलोकं ततोगमत्॥८१॥ प्राचीनबर्ही राजर्षिः प्रजासर्गाभिरक्षणे॥
आदिश्य पुत्रानगमत्तपसे कपिलाश्रमं॥८२॥ तत्रैकाग्रमना धीरो गोविंदचरणांबुजं। विमुक्तसंगोनुभजन्भक्त्या तत्साम्यतामगात्॥८३॥
एतदध्यात्मपारोक्ष्यं गीतं देवर्षिणानघ। यः श्रावयेद्यः शृणुयात्स लिंगेन विमुच्यते॥८४॥ एतन्मुकुंदयशसा भुवनं पुनानं देवर्षिवर्यमुख
निःसृतमात्मशौचं॥ यः कीर्त्यमानमधिगच्छति पारमेष्ठ्यं नास्मिन्भवे भ्रमति मुक्तसमस्तबंधः॥८५॥ अध्यात्मपारोक्ष्यमिदं मया
धिगतमद्भुतं। एवं स्त्रियाश्रमः पुंसः छिन्नोमुत्र च संशयः॥८६॥ ॥इति श्रीभागवते महापुराणे पारमहंस्यां संहितायां चतुर्थस्कं
धे नारदप्राचीनबर्हिसंवादे एकोनत्रिंशत्तमोध्यायः॥ ॥विदुर उवाच॥ ॥ये त्वयाभिहिता ब्रह्मन्सुताः प्राचीनबर्हिषः। ते रुद्रगीतेन ह
रिं सिद्धिमापुः प्रतोष्य कां॥१॥ किं बार्हस्पत्येह परत्र वाथ कैवल्यनाथप्रियपार्श्ववर्तिनः। आसाद्य देवं गिरिशं यदृच्छया प्रापुः परं नूनमथ
प्रचेतसः॥२॥ ॥श्रीमैत्रेय उवाच॥ ॥प्रचेतसोंतरुदधौ पितुरादेशकारिणः। जपयज्ञेन तपसा पुरंजनमतोषयन्॥३॥ दशवर्षसह
स्रांते पुरुषस्तु सनातनः। तेषामाविरभूत्कृच्छ्रं शांतेन शमयन्रुचा॥४॥ सुपर्णस्कंधमारूढो मेरुशृंगमिवांबुदः। पीतवासा मणिग्रीवः
कुर्वन्वितिमिरा दिशः॥५॥ काशिष्णुना कनकवर्णविभूषणेन भ्राजत्कपोलवदनो विलसत्किरीटः। अष्टायुधैरनुचरैर्मुनिभिः सुरेंद्रै
रासेवितो गरुडकिन्नरगीतकीर्तिः॥६॥ पीनायताष्टभुजमंडलमध्यलक्ष्म्या स्पर्धच्छ्रिया परिवृतो वनमालयाद्यः। बर्हिष्मतः पुरुष
आह सुतान्प्रपन्नान्पर्जन्यनादरुतया सघृणावलोकः॥७॥ ॥श्रीभगवानुवाच॥ ॥वरं वृणीध्वं भद्रं वो यूयं मे नृपनंदनाः। सौहार्दे

Indira Gandhi National Centre for the Arts

